विष्णुसूक्तम्

viṣṇusūktam

ॐ विष्णोर्नुकं वीर्याणि प्रोवोचं यः पार्थिवानि विममे रजाग्ंसि यो अस्कभायदुत्तरग्ं सधस्थं विचक्रमाणस्त्रेधोरुगायः । विष्णोरराटमसि विष्णोः पृष्ठमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥

om viṣṇornukaṁ vīryāṇi provocaṁ yaḥ pārthivāni vimame rajāgṁsi yo askabhāyaduttaragṁ sadhasthaṁ vicakramāṇasredhorugāyaḥ । viṣṇorarāṭamasi viṣṇoḥ pṛṣṭamasi viṣṇoḥ śnaptrestho viṣṇoḥ ssyūrasi viṣṇordhruvamasi vaiṣṇavamasi viṣṇave tvā ॥

तदस्य प्रियमभिपाथो अश्याम् । नरो यत्र देवयवो मदन्ति । उरुक्रमस्य स हि बन्धुरित्था । विष्णोः पदे परमे मध्व उथ्सः ।

tadasya priyamabhipātho aśyām। naro yatra devayavo madanti। urukramasya sa hi bandhuritthā। viṣṇoḥ pade parame madhva uthsaḥ।

प्रतद्विष्णुस्स्तवते वीर्याय । मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुवनानि विश्वा ।

radiosai

pratadviṣṇusstavate vīryāya। mṛgo na bhīmaḥ kucaro giriṣṭhāḥ।
yasyoruṣu triṣu vikramaṇeṣu। adhikṣiyanti bhuvanāni viśvā।

परो मात्रया तनुवा वृधान । न ते महित्वमन्वश्नुवन्ति ॥ उभे ते विद्म रजसी पृथिव्या विष्णो देवत्वम् । परमस्य वित्से ।

paro mātrayā tanuvā vṛdhāna। na te mahitvamanvaśnuvanti।।
ubhe te vidma rajasī pṛthivyā viṣṇo devatvam। paramasya vithse।

विचक्रमे पृथिवीमेष एताम् । क्षेत्राय विष्णुर्मनुषे दशस्यन् । ध्रुवासो अस्य कीरयो जनासः । ऊरुक्षितिगं सुजनिमाचकार ।

vicakrame pṛthivīmeṣa etām। kṣetrāya viṣṇurmanuṣe daśasyan।
dhruvāso asya kīrayo janāsaḥ । ūrukṣitigṁ sujanimācakāra।

त्रिर्देवः पृथिवीमेष एताम् । विचक्रमे शतर्चसं महित्वा । प्रविष्णुरस्तु तवसस्तवीयान् । त्वेषग्ग्ह्यस्य स्थविरस्य नाम ॥

trirdevaḥ pṛthivīmeṣa etām। vicakrame śatarcasaṁ mahitvā।
praviṣṇurastu tavasastavīyān। tveṣagghyasya sthavirasya nāma।।

radiosai

अतो देवा अवन्तुनो यतो विष्णु-र्विचक्रमे। पृथिव्यास्सप्त धामभिः। इदं विष्णु-र्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पागं्सुरे। त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः। ततो धर्माणि धारयन्। विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यस्सखा॥

ato devā avantuno yato viṣṇu-rvicakrame| pṛthivyāssapta dhāmabhiḥ| idaṁ viṣṇu-rvicakrame tredhā nidadhe padam| samūḍhamasya pāgṁ sure| trīṇi padā vicakrame viṣṇurgopā adābhyaḥ| tato dharmāṇi dhārayan| viṣṇoḥ karmāṇi paśyata yato vratāni paspaśe| indrasya yujyassakhā||

तद्विष्णोः परमं पदगं् सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्। तद्विप्रासो विपन्यवो जागृवागं् सस्समिन्धते। विष्णो-र्यत्परमं पदम्। पर्याप्त्या अनन्तरायाय सर्वस्तोमोऽति रात्र उत्तम महर्भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति॥

tadviṣṇoḥ paramaṁ padagṁ sadā paśyanti sūrayaḥ| divīva cakṣurātatam| tadviprāso vipanyavo jāgṛvāgṁ sassamindhate| viṣṇo-ryatparamaṁ padam| paryāptyā anantarāyāya sarvastomo'ti rātra uttama maharbhavati sarvasyāptyai sarvasya jityai sarvameva tenāpnoti sarvaṁ jayati||

ॐ शान्तिः शान्तिः शान्तिः॥

om śāntiḥ śāntiḥ śāntiḥ||